# ॥ ध्रुव कृत भागवत स्तुति ॥

ध्रुव उवाच

योऽन्त: प्रविश्य मम वाचमिमां प्रसुप्तां
सञ्जीवयत्यखिलशक्तिधर: स्वधाम्ना ।

अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते
पुरुषाय तुभ्यम् ।।1।।

एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरूगुणया
महदाधशेषम् ।

सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्
विभासि ।।2।।

त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ
भवत्प्रपन्न: ।

तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा
कथमार्तबन्धो ।।3।।

नूनं विमुष्टमतयस्तव मायया ते ये त्वां
भवाप्ययविमोक्षणमन्यहेतो: ।

अर्चन्ति कल्पकतरुं कुणपोपभोग्यमिच्छन्ति यत्स्पर्शजं
निरयेऽपि न्रणाम् ।।4।।

या निर्व्रतिस्तनुभृतां तव पादपद्मध्यानाद्
भवज्जनकथाश्रवणेन वा स्यात् ।

सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं
त्वन्तकासिलुलितात् पततां विमानात् ।।5।।

भक्तिं मुहु: प्रवहतां त्वयि मे प्रसंगो भूयादनन्त
महताममलाशयानाम् ।

येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये
भवद्गुणकथामृतपानमत्त: ।।6।।

ते न स्मरन्त्यतितरां प्रियमीश मर्त्यं ये चान्वद:
सुतसुहृदग्रहवित्तदारा: ।

ये त्वब्जनाभ भवदीयपदारविन्दसौगन्ध्यलुब्धहृदयेषु
कृतप्रसंगा: ।।7।।

तिर्यगद्विजसरीसृपदेवदैत्यमत्र्यादिभि: परिचितं
सदसद्विशेषम् ।

रूपं स्थविष्ठमज ते महदाधनेकं नात: परं परम वेद्मि न यत्र
वाद: ।।8।।

कल्पान्त एतदखिलं जठरेण ग्रहणन् शेते पुमान्
स्वदृगनन्तसखस्तदंके ।

यन्नाभिसिन्धुरूहकाञ्चनलोकपद्मगर्भे धुमान् भगवते
प्रणतोऽस्मि तस्मै ।।9।।

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो
भगवांस्त्र्यधीश: ।

यद् बुद्धयवस्थितिमखण्डितया स्वदृष्टया दृष्टा
स्थितावधिमखो व्यतिरिक्त आस्से ।।10।।

यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति विद्यादयो
विविधशक्तय आनुपूर्व्यात् ।

तद् ब्रह्म विश्वभवमेकमनन्तमाधमानन्दमात्रमविकारमहं
प्रपधे ।।11।।

सत्याऽऽशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजत:
पुरुषार्थमूर्ते: ।

अप्येवमर्य भगवान् परिपाति दीनान् वाश्रेव
वत्सकमनुग्रहकातरोऽस्मान् ।।12।।

paramsoul.com